श्रीमदनमोहनदेवोजयति॥ ॥ईश्वरःपरमःकृष्णःसच्चिदानंदविग्र
हः।अनादिरादिर्गोविंदःसर्वकारणकारणं॥१॥सहस्रपत्रकमलंगोकु
लाख्यंमहत्पदं।तत्कर्णिकारंतद्धामतदनंतांशसंभवं॥२॥कर्णिकारं
महद्यंत्रंषट्कोणंवज्रकीलकं।षडंगंषट्पदीस्थानंप्रकृत्यापुरुषेण
च॥३॥प्रेमानंदमहानंदरसेनावस्थितंहियत्।ज्योतिरूपेणमनुना
कामबीजेनसंगतं॥४॥तत्किंजल्कंतदंशानांतत्पत्राणिश्रियामपि।

चतुरस्रंतत्परितःश्वेतद्वीपाख्यमद्भुतं॥५॥चतुरस्रंचतुर्मूर्तिश्चतुर्द्वारंचतुष्कृ
तं।चतुर्निःपुरुषार्थैश्चचतुर्निर्हेतुनिर्मितं॥६॥भूतैर्दशभिरानद्धमूर्द्धोर्ध्वा
दिविदिक्ष्वपि।ऋष्टभिर्निधिभिर्जुष्टमष्टाभिःसिद्धिभिस्तथा॥७॥मनुरूपै
श्चदशभिर्दिक्पालैःपरितोवृतं।श्यामैर्गौरैश्चरक्तैश्चशुक्लैश्चपार्षदर्षभैः
॥८॥शोभितंशक्तिभिस्ताभिरद्भुताभिःसमंततः॥एवंज्योतिर्मयोदेवः
सदानंदपरात्परः॥९॥आत्मारामस्यतस्यास्तिप्रकृत्यानसमागमः।मा
यया रममाणस्यनवियोगस्तयासह॥१०॥आत्मनारमयारेमेत्यक्तकालं

सिसृक्षया । नियतिःसारमादेवीतत्प्रियातद्वशंवदा ॥११॥तल्लिंगंभगवान्
शंभुर्ज्योतिरूपःसनातनः । यायोनिःसापराशक्तिःकामबीजंमहद्वरेः॥१२
॥लिंगयोन्यात्मिकाजाताउमामाहेश्वरीःप्रजाः॥शक्तिमान्पुरुषःसोऽयं
लिंगरूपोमहेश्वरः॥१३॥तस्मिन्नाविश्यभूल्लिंगेमहाविष्णुर्जगत्पतिः। सह
स्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥१४॥सहस्रबाहुर्विश्वात्मासर्वस्रो
शःसहस्रसूः। नारायणःसभगवानापस्तस्मात्सनातनात्॥१५॥>प्राविरा
सत्कारणार्णोनिधिःसंकर्षणात्मकः। योगनिद्रांगतस्तस्मिन्सहस्रांशुः॥

२

स्वयंमहान्॥१६॥तद्रोमविलजालेषुबीजंसंकर्षणस्यच। हैमान्यंडानिजातानि
महानृताइतानितु॥१७॥प्रत्यंडमेकमेकांशादेकांशाद्विशतिस्वयं। सहस्रमू
र्द्धाविश्वात्मामहाविष्णुःसनातनः॥१८॥वामांगादसृजद्विष्णुंदक्षिणांगात्प्र
जापतिं। ज्योतिर्लिंगमयंशंभुंकूर्चदेशादवासृजत्॥१९॥>अहंकारात्मकं
विश्वंतस्मादेतदजायत। >प्रतस्तेस्त्रिविधैर्वैषै लीलामुद्वहतःकिल॥२०॥
योगनिद्रागतस्यश्रीरविसंगता। सिसृक्षायांततोनाभेस्तस्यपद्मंविनि
र्ययौ॥२१॥तन्नालंहेमनलिनंब्रह्मणोलोकमद्भुतं। तत्रानिपूर्वरूढानिका

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ब्र.सं. २ रणानिपरस्परं ॥२३॥समवायात्प्रयोगाच्चविभिन्नानिपृथक्पृथक् । चि
च्छक्त्यासज्जमानोथभगवानादिपूरुषः ॥२३॥योजयन्मायया देवोयोग
निद्रामकल्पयत् ॥योजयित्वाथतान्येवप्रविवेशस्वयंगुहां ॥२४॥गुहांप्रवि
ष्टेतस्मिंस्तुजीवात्माप्रतिबुध्यते । सनित्योनित्यसंबंधःप्रकृतिश्चपरैर्वृतः
॥२५॥एवंसर्वात्मसंबंधंनान्यंपश्यंहरेरसृत् । तत्रब्रह्मामवद्वयश्चतुर्वेदी
चतुर्मुखः ॥२६॥सजातोनवचक्त्यातत्कालेकिलचोदितः । सिसृक्षायांम
तिंचक्रेपूर्वसंस्कारसंस्कृतां ॥२७॥ददर्शकेवलंध्यानेनान्यत्किमपिसर्वतः

॥उवाचपुरतस्तस्मैतस्यदीप्तसरस्वती ॥२८॥कामःकृष्णायगोविंदेगोपीजनइत्यपि
।वल्लभायप्रियावक्रेरयंतेदास्यतिप्रियं ॥२९॥तपस्वंतपएतेनतवसिद्धिर्नविष्य
ति ।>प्रथतेपेससुचिरंप्रीणनगोविंदमव्ययं ॥३०॥श्वेतद्वीपपतिंकृष्णंगोलोक
स्थंपरात्परं । प्रभुत्यागुणरूपिण्यासर्वतःपर्य्युपासितं ॥३१॥सहस्रदलसंप
न्नेकोटिकिंजल्कहंहिते । भूमिश्चिंतामणिस्तत्रकर्णिकारेमहासने ॥३२॥स
मासीनंचिदानंदंज्योतीरूपंसनातनं । पाड्वब्रह्ममयंवेणुवादयंतंमुखांबुजे ॥
३३॥विलासिनीगणवृतंस्वैस्वैरंशेरनिष्टुतं ।>प्रथवेणुनिनादस्यत्रयीमूर्तिम
यीगतिः ॥३४॥स्फुरंतीप्रविवेशाशुमुखाब्जानिस्वयंभुवः । गायत्रीगायतस्तस्माद्

धिगत्यसरोजजः ॥ ३५ ॥ संस्कृताधिगुरुणाहिजनामगमन्नतः । त्रय्याप्रबुद्धोथवि
धिर्विज्ञाततत्त्वसागरः ॥ तुष्टावविदसारेणस्तोत्रेणानेनकेशवं ॥ ३६ ॥ ० ॥
श्रीब्रह्मोवाच ॥ चिंतामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषुसुरभीरभिपा
लयंतं । लक्ष्मीसहस्रशतसेव्यमानंगोविंदमादिपुरुषंतमहंभजामि ॥ १ ॥ वे
णुंकणंतमरविंददलायताक्षंबर्हावतंसमसितांबुजसुंदरांगं । कंदर्पकोटिक
मनीयविशेषशोभंगोविंदमित्यादि ॥ २ ॥ आलोलचंद्रकलसद्वनमाल्यवंशीर
त्नांगदप्रणयकेलिकलाविलासं । श्यामंत्रिभंगललितंनियतप्रकाशंगो ॥ ३ ॥
आनंदचिन्मयसदुज्ज्वलविग्रहस्यगो ॥ ४ ॥ अद्वैतमच्युतमनादिमनंतरूपमाद्यंपुराण
पुरुषंनवयौवनंच । वेदेषुदुर्लभमदुर्लभमात्मभक्तौगो ॥ ५ ॥ यथाश्रुतोटिशतव
त्सरसंप्रगम्यो वायोरथापिमनसोमुनिपुंगवानां । सोप्यस्तियत्पदसीम्न्यवि
श्चित्यतत्रेगो ॥ ६ ॥ एकोप्यसौरचयितुंजगदंडकोटिंयच्छक्तिरस्तिजगदंडच
याश्रयदंतः । अंडांतरस्थपरमाणुचयांतरस्थंगो ॥ ७ ॥ यद्भावभावितधियोम
नुजास्तथैवसंप्राप्यरूपमहिमासनयानभूषाः । सूक्तैर्यमेवनिगमप्रथितैःस्तु
वंतिगोविंद ॥ ८ ॥ आनंदचिन्मयरसप्रतिभाविताभिस्ताभिर्यएवनिजरूप
तयाकलाभिः । गोलोकएवनिवसत्यखिलात्मभूतोगोविंद ॥ ९ ॥ प्रेमांज

नच्छुरितनक्किविलोचनेनसंतःसदैवहृदयेषुविलोकयंति। यंश्यामसुंदरम
चिंत्यगुणस्वरूपंगो॰॥१०॥रामादिमूर्तिषुकलानियमेनतिष्ठन्नानावता
रमकरोद्भुवनेषुकिंतु। कृष्णःस्वयंसमभवत्परमःपुमान्योगो॰॥११॥यः
स्यप्रभाप्रभवतोजगदंडकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नं। तद्ब्र
ह्मनिष्कलमनंतमगाधबोधंगो॰॥१२॥मायाहियस्यजगदंडशतानिसू
तेत्रैगुण्यतद्विषयवेदवितायमाना। सत्त्वावलंबिपरसत्त्वविशुद्धसत्त्वं गो॰॥
१३॥आनंदचिन्मयरसात्मतयामनःसुयःप्राणिनांप्रतिफलन्स्मरतामु
पेत्य।लीलायितेनभुवनानिजयत्यजस्रंगो॰॥१४॥गोलोकनाम्निनिजधाम्नितले

चयस्यदेवीमहेशहरिधामसुतेषुतेषु। तेतेप्रभावनिचयाविहितास्त्रयेनगोविं॥
१५॥सृष्टिस्थितिप्रलयसाधनशक्तिरेकाछायेवयस्यभुवनानिविभर्तिदुर्गा।
इच्छानुरूपमपियस्यचचेष्टतेसागो॰॥१६॥क्षीरंयथादधिविकारविशेषयो
गात्संजायतेनतुततःपृथगस्तिहेतोः।यःशंभुतामपितथासमुपैतिकार्य्यात्
गोविंदमित्यादि॥१७॥दीपार्चिरेवहिदशांतरमभ्युपेत्यदीपायतेविवृतहेतु
समानधर्मा।यस्तादृगेवहिचविष्णुतयाविभातिगो॰॥१८॥यःकारणार्णव
जलेभजतिस्मयोगनिद्रामनंतजगदंडसरोमकूपः।आधारशक्तिमवलंब्यप
रांस्वमूर्तिंगो॰॥१९॥यस्यैकनिःश्वसितकालमथावलंब्यजीवंतिरोमविलजाजग

दंडनायाः। विष्णुर्महान्सइहयस्यकलाविशेषोगो॰॥२०॥नास्वान्यथारूपश
कलेषुनिजेषुतेजःस्वीयंक्रियत्यकटयत्यपितद्वदत्र।ब्रह्मायएवजगदंडवि
धानकर्तागो॰॥२१॥यत्पादपद्मयुगंविनेधायकुंजद्देवप्रणामसमयेसगणा
धिराजः।विघ्नान्विहंतुमलमस्यजगत्त्रयस्यगो॰॥२२॥अग्निर्महीगगनमंबु
मरुद्दिशश्चकालस्तथात्ममनसीतिजगत्त्रयाणि।यस्माद्भवंतिविलयंवनिविशं
तियंचगो॰॥२३॥यच्चक्षुरेवसवितासकलग्रहाणांराजासमस्तसुरमूर्तिरशे
षतेजाः।यस्याज्ञयान्नमतिसंनृतकालचक्रेगो॰॥२४॥धर्मार्थकामनिचयः
कृतयस्तपांसिब्रह्मादिकीटपतगावधयश्चजीवाः।यद्भ्रूविभंगविभवःप्रक

टयत्यवागो॰॥२५॥यत्क्रिंडयोपमथवेंद्रमहोत्सवकर्मबंधानुरूपफलभाजनमान
वोऽति।कर्माणिनिर्दहतिकिंतुचभक्तिभाजांगो॰॥२६॥यंक्रोधकामसहजप्र
णयादिभीतिवात्सल्यमोहगुरुगौरवसेव्यभावैः।संचिंत्यतस्यसदृशीतनुमा
पुरेतेगो॰॥२७॥श्रियःकांताःकांतःपरमपुरुषःकल्पतरवोद्रुमाभूमिश्चिंता
मणिगणमयीतोयममृतं।कथागानंनाट्यंगमनमपिवंशीप्रियसखीचिदा
नंदज्योतिःपरमपितदास्वाद्यमपिच॥२८॥ययत्रक्षीराब्धिःसरतिसुरभी
भ्यश्चसुमहान्निमेषार्द्धाख्योवाव्रजतिनहियत्रापिसमयः।अजेश्वेतद्वीपेनम
हमिहगोलोकमितियंविदंतस्तेसंतःक्षितिविरलचाराःकतिपये॥२९॥अ

योवाचमहाविष्णुर्भगवंतंप्रजापतिं । ब्रह्मन्महत्वंविज्ञानेप्रजासर्गेचचेन्मतिः
॥३०॥पंचश्लोकमयींविद्यांवक्ष्यतत्वंनिबोधमे । प्रबुद्धेज्ञाननक्रिम्यामात्मन्या
नंदचिन्मयी ॥३१॥उदेत्यनुत्तमाभक्तिर्भगवत्प्रेमलक्षणा । प्रमाणैस्तत्सदा
चारैस्तदभ्यासेनिरंतरं ॥३२॥बोधयत्यात्मनात्मानंनक्रियत्युत्तमांलभेत् ।
यस्याःश्रेयस्करंनास्तिययानिर्वृतिमाप्नुयात् ॥३३॥यासाधयतिमामेवन
क्रियतामेवसाधयन् । धर्मानन्यानपरित्यज्यमामेकंभजविश्वसन् ॥३४॥या
दृशीभावनायस्यसिद्धिर्भवतितादृशी ॥ तदुक्तमन्यत्रापि ॥कुर्वन्निरंतरं
कर्मलोकोयमनुवर्तते । तेनैवकर्मणाध्यायन्मांपरंभक्तिमिच्छसि॥३५॥

अहंहिविश्वस्यचराचरस्यबीजंप्रधानंप्रकृतिःपुमांश्च । मयाहितंतेजइदंवि
भर्षिविधेविधेहिक्षमथोजगंति ॥३६॥अन्यत्रच ॥अध्यायशतसंपन्ना
भगवद्ब्रह्मसंहिता । कृष्णोयनिषदासारैःसंचितावह्मणोदिता ॥ ॥
इतिश्रीब्रह्मसंहितायांभगवत्सिद्धांतसंग्रहेमूलसूत्राख्यःपंचमोऽध्यायः
॥ ॥ ॥ ॥श्रीरस्तु ॥ ॥ ॥ ॥ श्रीः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017